A First EPQRST Journal-www.jahnavisanskritejournal.com, Issue-17th, Vol.-V, 14.1.14

ISSN 976-8645

# अद्वैतवेदान्तदर्शने मोक्षस्वरुपम्

वासुमोहनः

*कूटशब्दाः* *मुक्तिः, ज्ञानम्, अविद्या, अद्वैतम्, मोक्षः, नित्यः।*

*भारतीयदर्शनेषु मोक्षपदं परमपुरुषार्थस्यापरपर्य्यात्वेन सर्वोत्कृष्टं स्थानं भजते। तत्राद्वैतमते स्वस्वरूपावाप्तिरेव मोक्ष इति कथ्यते। ब्रह्माजीवयोर्मध्ये भेदो न सम्भवति। यथा जलबिन्दुर्जलाशयाद्भिन्नो न भवति, यथा च वृक्षो वनाद्भिन्नो न भवति, तथैव जीवो ब्रह्मणस्सकाशाद्भिन्नो न भवतीति भावः। किन्तु ब्रह्मात्मकोऽपि जीव अविद्ययावृत्तस्स्वं ब्रह्मात्मकं रूपं न विजानाति। किन्तु यदा जीवस्य ज्ञानोदयो भवति तदा अज्ञाननिवृत्त्या ब्रह्मात्मैक्यस्य प्रकाशो जायते। अत अविद्यानिवृत्तरूपः, जीवब्रह्मैक्यज्ञानोदयरुपः, आत्मसाक्षात्काररूप एव मोक्ष इत्युच्यते।*

**वेदान्तपदनिर्वचनम्ः-**

**'तिलेषु तैलवद्वेदे वेदान्तः सुप्रतिष्ठितः**[१]' इति श्रुतिवचनात् ज्ञायते यत् यथा तिलेषु तैलं सारभूतं वर्तते, तद्वदेव वेदेषु वेदान्तोऽपि सारभूत एव। तत्र 'वेदानामन्त इति वेदान्त' इति व्युत्पत्त्या वेदानां संहिता-ब्राह्मण-आरण्यक-उपनिषदात्मकेषु चतुर्षु भागेष्वुपनिषदेवान्तिमो भागः। अत एव उपनिषदेव वेदान्तनाम्नोच्यते। तदुक्तं सदानन्दयोगीन्द्राचार्येण-

**'वेदान्तो नामोपनिषत्प्रमाणम्'**[२]

उप-नि-उपसर्गपूर्वकात् षद्लृ-विशरणगत्यवसादनेषु धातोः क्विप्-प्रत्यये उपनिषदिति निष्पद्यते। भगवद्भाष्यकारश्शङ्कराचार्यभगवत्पाद उपनिषच्छब्दस्य व्युत्पत्तिं व्याचक्षाण आह- 'सदेर्धातोर्विशरणगत्यवसादनार्थस्योपनिपूर्वस्य क्विप्प्रत्ययान्तस्य रूपमुपनिषदिति'।[३] अपि च 'य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसराः सन्तस्तेषां गर्भजन्मजरारोगाद्यनर्थपूगं निशातयति परं वा ब्रह्म गमयत्यविद्यादिसंसारकारणं चात्यन्तमवसादयति विनाशयतीत्युपनिषत्, उपनिपूर्वस्य सदेरेवमर्थस्मरणात्।'[४]

ISSN 976-8645

**मोक्षपदार्थविचारः-**

मोक्षपदं परमपुरुषार्थस्यापरपर्य्यायत्वेनाङ्गीकुर्वन्ति दार्शनिकाः। तत्र धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः। यथा च **'न स पुनरावर्तते'**[५], **'यद्गत्वा न निवर्तन्ते तद्धाम परमं मम'**[६] **'अनावृत्तिः शब्दादनावृत्तिः शब्दात्'**[७] इत्यादिभिः श्रुतिस्मृतिसूत्रसहस्रवाक्यैः मोक्षस्य नित्यत्वमप्यवगम्यते। मोक्षपदस्यार्थस्तु-'मुच्यते सर्वैर्दुःखबन्धनैर्यत्र सः मोक्ष' इति। 'मोक्ष अवसाने' धातोः घञ्-प्रत्यये कृते सति मोक्षशब्दो निष्पद्यते। मुक्तिरपि मोक्षस्य परपर्य्याय एव। 'मुच्लृ मोचने' धातोः क्तिन्प्रत्यये मुक्तिशब्दो व्युत्पद्यत इति।

**अद्वैतवेदान्तदर्शनोक्तमोक्षस्य स्वरूपम्-**

अद्वैतवेदान्तदर्शने स्वस्वरूपावस्थितिरेव मोक्ष इति। जीवो ब्रह्मणस्सकाशादभिन्न एव। यथा जलबिन्दुर्जलाशयाद्भिन्नो न भवति, यथा च वृक्षो वनाद्भिन्नो न भवति, तथैव जीवो ब्रह्मणस्सकाशाद्भिन्नो न भवतीति भावः। तदुक्तम्-

**''जीवो ब्रह्मात्मना ज्ञेयो ज्ञेयं जीवात्मना परम्।**
**मुक्तिस्तदैक्यविज्ञानादिति वेदान्तडिण्डिमः।।''**[८]

अर्थात् जीवब्रह्मणोरैक्यविज्ञानात् मोक्षो भवतीति वेदान्ता उद्घोषयन्ति। अत अद्वैतसिद्धान्तप्रचारकश्शङ्कराचार्यभगवत्पादः 'जीवो ब्रह्मैव नापर' इत्यवोचत्।

**मोक्षस्य नित्यत्वम्-**

आचार्येण भगवद्भाष्यकारेण मोक्ष एवं न्यरुपि-'इदं तु पारमार्थिकं कूटस्थं नित्यं व्योमवत्सर्वव्यापि सर्वविक्रियारहितं नित्यतृप्तं निरवयवं स्वयंज्योतिः स्वभावम्। यत्र धर्माधर्मौ सह कार्येण कालत्रयं च नोपावर्तेते। तदेतदशरीतत्वं मोक्षाख्यम्'।[९] अस्यार्थं स्पष्टीकुर्वाणो भामतीकार आह-'अत्र च कूटस्थनित्यमिति निर्वर्त्यकर्मतामपाकरोति, सर्वव्यापीति प्राप्यकर्मताम्, सर्वविक्रियारहितमिति विकार्य्यकर्मताम्, निरवयवमिति संस्कार्य्यकर्मताम्।''[१०] अर्थात् मोक्ष घटादिवदुत्पाद्यो नास्त्यन्यथा 'यत्कार्यं तदनित्यमि'ति नियमादनित्यस्स्यात्। दुग्धस्य दधिरुपवत् मोक्षो विकार्योऽपि नाङ्गीकृतः,यतो लोके विकार्यपदार्थानामनित्यतां जानन्त्येव सर्वे। यथा च भाष्यकार अवादीत्-'यस्य तूत्पाद्यो मोक्षस्तस्य मानसं, वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्यमुत्पाद्यं वा घटादि नित्यं दृष्टं लोके।'[११] किञ्च

ISSN 976-8645

ब्रह्मज्ञानादाप्यत्वेऽपि मोक्षस्य कार्यानपेक्षत्वात् स्वात्मस्वरूपत्वाच्च न भवति विकार्यत्वमपि। नापि संस्कार्यो मोक्षः। संस्कार्यस्य पदार्थस्य गुणाधानेन दोषापनयेन व संस्कारस्सम्भवति। मोक्षस्य त्वाधेयातिशयरहितत्वात् ब्रह्मस्वरूपत्वाच्च नास्ति गुणाधानरुपेण संस्कार्यत्वम्, नित्यशुद्धबुद्धब्रह्मस्वरुपत्वाच्च मोक्षस्य दोषापनयेनापि संस्कार्यत्वं न भवतीति मोक्षस्य नित्यत्वम्।

**मोक्षस्य विलक्षणत्वम्-**

मोक्षः तादृशी काचनावस्था यस्यां व्यवहारिकस्सर्वेऽपि विकारा न तिष्ठन्ति। वस्तुतस्तु ब्रह्मैवोपाधिवशाज्जीवत्वमिति व्यवह्रियते। यावदेव जीवस्स्वनित्यशुद्धबुद्धमुक्तस्वरुपं न विजानाति तावदेव तस्य जीवत्वम्, विज्ञाते तु कूटस्थप्रत्यगात्मानं तस्य ब्रह्मत्वं तु स्वयमेव सिद्ध्यति। तदुक्तं भगवता शङ्करावतारेण शङ्कराचार्येण-'यावदेव हि स्थाणाविव पुरुषबुद्धिं द्वैतलक्षणामविद्यां निवर्तयन्कूटस्थनित्यदृक्स्वरुपमात्मानमहं ब्रह्मस्मीति न प्रतिपद्यते, तावज्जीवस्य जीवत्वम्। यदा तु देहेन्द्रियमनोबुद्धिसंघाताद्व्युत्थाय श्रुत्या प्रतिबोध्यते, नासि त्वं देहेन्द्रियमनोबुद्धिसंघातः, नासि संसारी, किं तर्हि ? तद्यत्सत्यं स आत्मा चैतन्यमात्रस्वरुपस्तत्त्वमसीति, तदा कूटस्थनित्यदृक्स्वरुपमात्मानं प्रतिबुध्यास्माच्छरीराद्यभिमानात् समुत्तिष्ठन्स एव कूटस्थनित्यदृक्स्वरुप आत्मा भवति।'[१२]

**ज्ञानादेव मोक्षः-**

किञ्चास्य मोक्षस्य ज्ञानादेवोपलब्धिर्भवतीति ब्रुवाणो भगवान् शङ्कर आह-

**'न योगेन न साङ्ख्येन कर्मणा नो न विद्यया।**
**ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा।।'**[१३]

ज्ञानादृते मार्गान्तरेण तु शतकल्पेष्वपि मुक्तिर्न भवति। तदुक्तम्-

**'वदन्तु शास्त्राणि यजन्तु देवान्**
**कुर्वन्तु कर्माणि भजन्तु देवताः।**
**आत्मैक्यबोधेन विना विमुक्ति-**
**-र्न सिध्यति ब्रह्मशतान्तरेऽपि।।'**[१४]

एवं **'तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय'**[१५], **'न चेदिहावेदीन्महती विनष्टिः'**[१६], **'तरति शोकमात्मवित्'**[१७], **'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः'**[१८], **'स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति'**[१९], **'तत्र को मोहः कः शोक एकत्वमनुपश्यतः'**[२०] इत्यादिभिस्सहस्रश्रुतिवाक्यै ज्ञानादेव मोक्षो भवतीति निश्चप्रचम्। तदुक्तं भगवता अर्जुनोपदेशव्याजेन-

ISSN 976-8645

**'सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि।'**[२१]

**'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।'**[२२]

इति शिवम्।

# अन्तटिप्पणी

१. मुक्तिकोपनिषदि-१, ९
२. वेदान्तसारे
३. कठोपनिषदि  सम्बन्धभाष्ये
४. मुण्डकोपनिषदि सम्बन्धभाष्ये
५. छान्दोग्योपनिषदि-८.१५.१
६. श्रीमद्भगवद्गीतायाम् १५.६
७. ब्रह्मसूत्रे ४.४.२२
८. वेदान्तडिण्डिमे-१६
९. ब्रह्मसूत्रशाङ्करभाष्ये-१.१.४
१०. ब्रह्मसूत्राशाङ्करभाष्ये भामत्याम्-१.१.४
११. ब्रह्मसूत्रशाङ्करभाष्ये १.१.४
१२. तत्रैव १.३.१९
१३. विवेकचूडामणौ ५८
१४. तत्रैव ६
१५. श्वेताश्वतरोपनिषदि ६.१५
१६. केनोपनिषदि-२.५
१७. छान्दोग्योपनिषदि-७.१.३
१८. मुण्डकोपनिषदि २.२.८
१९. तत्रैव ३.२.९
२०. ईशावास्योपनिषदि ७
२१. श्रीमद्भगवद्गीतायाम् ४.३६
२२. तत्रैव ४.३७

ISSN 976-8645

# सन्दर्भग्रन्थसूची


१. ब्रह्मसूत्रशाङ्करभाष्यम्–स्वामी दयानन्द सरस्वती, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, 2011

२. ईशाद्यष्टोत्तरशतोपनिषदः, श्री वासुदेव शर्मा, चौखम्बा विद्याभवन, वाराणसी, 2002

३. विवेकचूडामणि, श्रीमच्छङ्कराचार्यः, श्री अरविन्दानन्दः, चौखम्बा विद्याभवन, वारणसी, 1998

४. श्रीमद्भगवद्गीता, श्रीशम्भुजनुर्गजाननशर्मा, परिमलपब्लिकेशन्स, दिल्ली, 2000

५. वेदान्तसारः, श्रीसदानन्दयोगीन्द्र, डॉ. लम्बोदरमिश्रः, राष्ट्रियसंस्कृतसाहित्यकेन्द्र, जयपुर, 2010

६. वेदान्तडिण्डिमः, श्री नृसिंहसरस्वती, श्रीसच्चिदानन्देन्द्रसरस्वती, अध्यात्मकप्रकाश–कार्यालयः, होलेनरसिपुरः, 2002